# प्रार्थना



असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मा अमृतं गमय।



सरस्वति! नमस्तुभ्यं वरदे कामरूपिणि।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा।।

# सुवचनानि

प्रथमः पाठः

1. **सर्वे भवन्तु सुखिनः**
**सर्वे सन्तु *निरामयाः*।**
**सर्वे *भद्राणि* पश्यन्तु,**
**मा कश्चित् *दुःखभाग्* भवेत्॥**

**अन्वयः–** सर्वे सुखिनः भवन्तु, सर्वे निरामयाः सन्तु, सर्वे भद्राणि पश्यन्तु, कश्चित् दुःखभाग् मा भवेत्।

**भावार्थः–** अस्मिन् संसारे सर्वे जनाः सुखयुक्ताः रोगरहिताः च भवन्तु। सर्वेषां कल्याणं भवतु। कः अपि दुःखी न भवतु।

2. **अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।**
**उत्तमा मानमिच्छन्ति मानो हि *महतां* धनम्॥**

**अन्वयः–** अधमाः धनम् इच्छन्ति, मध्यमाः धनं मानं च (इच्छन्ति)। उत्तमाः मानम् इच्छन्ति, मानः हि महतां धनम् (भवति)।

**भावार्थः–** संसारे त्रिविधाः जनाः भवन्ति। एतेषु ये अधमाः जनाः सन्ति ते सर्वदा येन केन प्रकारेण धनम् एव प्राप्तुम् इच्छन्ति। मध्यमश्रेण्याः जनाः धनेन सह सम्मानम् अपि इच्छन्ति। परं श्रेष्ठाः जनाः केवलं सम्मानं वाञ्छन्ति यतः तेषां कृते सम्मानः एव महत्त्वपूर्णः भवति, धनस्य कोऽपि मूल्यः न भवति।

## शब्दार्थाः: Word-Meaning

**निरामयाः** – निरोगी (healthy, without any disease) | **भद्राणि** – कल्याण (welfare)
**दुःखभाग्** – दुख का भागी (someone who bears sorrows) | **महताम्** – महान लोगों का (great people's)

3. *जाड्यं* धियो हरति सिञ्चति *वाचि* सत्यं
*मानोन्नतिं* दिशति पापम् *अपाकरोति*।
*चेत:* प्रसादयति दिक्षु *तनोति* कीर्तिं
सत्सङ्गति: कथय किं न करोति *पुंसाम्*।।

**अन्वय:–** सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति, कथय सत्सङ्गतिः पुंसां किं न करोति।

**भावार्थ:–** सज्जनानां मित्रता बुद्धेः मूर्खतां नाशयति। अनया एव मानवः सत्यं वदति अथवा सत्यस्य मार्गम् अनुसरति। सज्जनानां मित्रतया मनुष्याः सम्मानं प्राप्नुवन्ति, श्रेष्ठैः कर्मभिः उन्नतिं च प्राप्नुवन्ति, सज्जनानां मित्रतया मनुष्यस्य पापकर्म नष्टं भवति, मनः च प्रसन्नं भवति। मनुष्यः सर्वत्र कीर्तिं प्राप्नोति अर्थात् सज्जनानां मित्रतया एव मानवस्य पूर्णरूपेण विकासः भवति, न दुष्टानाम् मित्रतया।

4. *निन्दन्तु* नीतिनिपुणा: यदि वा *स्तुवन्तु*
लक्ष्मी: समाविशतु गच्छतु वा *यथेष्टम्*।
अद्यैव वा मरणमस्तु *युगान्तरे* वा
*न्यायात्पथ:* प्रविचलन्ति पदं न *धीरा:*।।

**अन्वय:–** नीतिनिपुणाः यदि निन्दन्तु स्तुवन्तु वा, लक्ष्मीः समाविशतु, यथेष्टं वा गच्छतु, मरणम् अद्यैव अस्तु युगान्तरे वा, धीराः न्यायात् पथः पदं न प्रविचलन्ति।

**भावार्थ:–** अस्मिन् संसारे ये धीराः जनाः सन्ति, नीतिपालने सिद्धाः जनाः यदि तेषां निन्दां कुर्वन्ति प्रशंसां वा, तेषां समीपे धनं तिष्ठति न वा, तेषां मृत्युः अद्य भवति अथवा बहुकालस्य पश्चात् परन्तु ते धैर्यवन्तः जनाः सत्यस्य मार्गं कदापि न त्यजन्ति। अर्थात् बुद्धिमन्तः जनाः निन्दायाः प्रशंसायाः, धनस्य मृत्योः च भयेन सत्यस्य मार्गं कदापि न त्यजन्ति।

## शब्दार्था: Word-Meaning

**जाड्यम्** – मूर्खता/जड़ता (foolishness) | **वाचि** – वाणी में (in speech)
**मानोन्नतिं** – सम्मान में वृद्धि (enhancement in honour, respect) | **अपाकरोति** – दूर करती है (drives away)
**चेत:** – मन को (heart) | **तनोति** – फैलाती है (spreads) | **पुंसाम्** – पुरुषों/व्यक्तियों का (people's)
**निन्दन्तु** – बुराई करे (may defame) | **स्तुवन्तु** – प्रशंसा करें (may praise) | **यथेष्टम्** – इच्छानुसार (as per own will)
**युगान्तरे** – लम्बे समय बाद (after a long period) | **न्यायात्पथ:** – न्याय के मार्ग से (from the path of justice)
**धीरा:** – धैर्यशाली लोग (people having patience)

5. पापा*न्निवारयति* योजयते हिताय

*गुह्यं निगूहति* गुणान्प्रकटीकरोति।

आपद्गतं च न जहाति ददाति काले

सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥

**अन्वयः–** (सन्मित्रं) पापात् निवारयति, हिताय योजयते, गुह्यं निगूहति गुणान् प्रकटीकरोति। काले (सहयोगं) ददाति, आपद्गतं च न जहाति। सन्तः इदं सन्मित्रलक्षणम् प्रवदन्ति।

**भावार्थः–** सन्तः अर्थात् सज्जनाः श्रेष्ठमित्रस्य इदं लक्षणं वदन्ति यत् सन्मित्रं पापात् दूरं करोति, हितकराणि कार्याणि कर्तुं प्रेरयति। मित्रस्य दुर्गुणान् सर्वेषां समक्षे न कथयति अपितु गुणान् एव प्रकटयति। आपत्काले अपि सः मित्रं त्यजति न अपितु तस्य सहायतां करोति। तस्मै सर्वविधं सहयोगं यच्छति।

## शब्दार्थाः Word-Meaning

**निवारयति** – दूर करता है (makes him/her stay away) **गुह्यम्** – छिपाने योग्य को (to be hidden)
**निगूहति** – छिपाता है (hides)

## अभ्यासः

**1. पाठं पठित्वा वदन्तु लिखन्तु च 'शुद्धम्' अथवा 'अशुद्धम्'–**

(i) सत्सङ्गतिः कीर्तिं प्रसारयति। ------------------------------------

(ii) धैर्यवन्तः जनाः सत्यमार्गं त्यजन्ति। ------------------------------------

(iii) कविः इच्छति यत् सर्वेषां कल्याणं न भवतु। ------------------------------------

(iv) उत्तमाः जनाः धनम् इच्छन्ति। ------------------------------------

(v) सन्मित्रं हिताय योजयते। ------------------------------------

**2. मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयन्तु–**

(i) सर्वे सुखिनः --------------------------------।

(ii) अधमाः धनम् --------------------------------।

(iii) सत्सङ्गतिः पुसां किं न --------------------?

(iv) लक्ष्मीः यथेष्टं --------------------------------।

(v) सन्मित्रं गुणान् --------------------------------।

| मञ्जूषा |
|---|
| गच्छतु |
| इच्छन्ति |
| प्रकटयति |
| भवन्तु |
| करोति |

**3. मञ्जूषायाः उचितम् अर्थं चित्वा लिखन्तु–**

(i) चेतः --------------------------------

(ii) निरामयाः --------------------------------

(iii) वाचि --------------------------------

(iv) धीराः --------------------------------

(v) सन्तः --------------------------------

| मञ्जूषा |
|---|
| रोगरहिताः |
| धैर्यवन्तः |
| सज्जनाः |
| वाण्याम् |
| हृदयम् |

**4. एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) सन्मित्रम् कस्मात् निवारयति? ----------------------------------------

(ii) के निन्दन्तु यदि वा स्तुवन्तु? ----------------------------------------

(iii) का पापम् अपाकरोति? ----------------------------------------

(iv) अधमाः किम् इच्छन्ति? ----------------------------------------

(v) सर्वे कीदृशाः सन्तु? ----------------------------------------

**5. एतेषां प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च–**

(i) सन्तः कस्य लक्षणं प्रवदन्ति?

------------------------------------------------------------------------

(ii) धीराः कुतः पदं न प्रविचलन्ति?

------------------------------------------------------------------------

(iii) मध्यमाः जनाः किम् इच्छन्ति?

------------------------------------------------------------------------

(iv) सत्सङ्गतिः कस्याः जाड्यं हरति?

------------------------------------------------------------------------

(v) चित्तं का प्रसादयति?

------------------------------------------------------------------------

**6. स्थूलपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) उत्तमाः **मानम्** इच्छन्ति।

------------------------------------------------------------------------

(ii) **नीतिनिपुणाः** स्तुवन्तु निन्दन्तु वा।

------------------------------------------------------------------------

(iii) सत्सङ्गतिः **दिक्षु** कीर्तिं तनोति।

------------------------------------------------------------------------

(iv) सन्मित्रं **पापात्** निवारयति।

------------------------------------------------------------------------

7. उचितं भावं चित्वा (✓) इति चिह्नेन चिह्नितं कुर्वन्तु–

**(क) चेतः प्रसादयति–**

(i) मनः प्रसन्नं न भवति।

(ii) मनः दुःखी भवति।

(iii) चित्तं प्रसन्नं भवति।

**(ख) नीतिनिपुणः–**

(i) यः राजनीतिं जानाति।

(ii) यः व्यवहारे कुशलः अस्ति।

(iii) यः राजनीतिं पाठयति।

## ■ मूल्यात्मकः प्रश्नः

1. यदि कोऽपि दुष्टानां सङ्गतिं करोति तर्हि तस्य काः काः हानयः भवन्ति?
2. किं भवान्/भवती वा कदापि स्वमित्रस्य आपत्काले सहायताम् अकरोत्? स्वानुभवान् लिखन्तु।

## ■ गतिविधिः

1. सामूहिकरूपेण वैयक्तिकरूपेण च श्लोकानां सस्वरं वाचनं कुर्वन्तु।
2. पाठात् भिन्नम् एकम् अन्यत् नीतिश्लोकम् अन्विष्य अभ्यासपुस्तिकायां लिखन्तु।

## व्याकरणम्

# प्रश्नवाचकानि पदानि

### ■ किम्? (What क्या) 'सर्वनाम' पदम्

**त्रिषु लिङ्गेषु भिन्नरूपाणि**

| पुल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|
| कः (कौन, Who) | का (कौन, Who) | किम् (कौन/क्या, What) |
| कः बालकः अस्ति? | का बालिका अस्ति? | किं फलम् अस्ति? |

### ■ एवमेव अन्यानि रूपाणि–

| | | |
|---|---|---|
| के बालकाः? | कस्याः बालिकायाः? | कानि फलानि? |
| केन छात्रेण? | कस्याम् लतायाम्? | कानि वस्तूनि? |
| केभ्यः पुरुषेभ्यः? | काम् महिलाम्? | कस्य आम्रस्य? |
| कस्य जनस्य? | कस्यै मालायै? | कस्मिन् चक्रे? |
| कस्मिन् वृक्षे? | काः नार्यः? | केषाम् पुष्पाणाम्? |

## अभ्यासः

**1. 'किम्' शब्दस्य उचितरूपैः रिक्तस्थानानि पूरयन्तु–**

(i) ---------------------- माला? (ii) ---------------------- बालकात्?

(iii) ---------------------- लेखनी? (iv) ---------------------- मूषकैः?

(v) ---------------------- पुष्पे? (vi) ---------------------- मूषिकायाः?

(vii) ---------------------- पुष्पेषु? (viii) ---------------------- अजा?

(ix) ---------------------- वानरेभ्यः ? (x) ---------------------- वने ?

(xi) ---------------------- गजेन ? (xii) ---------------------- विमानानि ?

## वाक्यनिर्माणं कुर्वन्तु–

| | | |
|---|---|---|
| सः/सा | | धाव् |
| त्वम् | | पत् |
| अहम् | कदा | नम् |
| वयम् | कुत्र | चल् |
| युवाम् | कथम् | आ + गम् |
| आवाम् | किमर्थम् | खाद् |
| यूयम् | कुतः | क्रीड् |
| तौ/ते | | भ्रम् |

(i) ----------------------------------------------------------------------

(ii) ----------------------------------------------------------------------

(iii) ----------------------------------------------------------------------

(iv) ----------------------------------------------------------------------

(v) ----------------------------------------------------------------------

## अन्यानि प्रश्नवाचकानि पदानि–

| | | | |
|---|---|---|---|
| कदा | – | कब | When |
| कुत्र | – | कहाँ | Where |
| कथम् | – | कैसे/क्यों/किस प्रकार | How |
| किमर्थम् | – | किसलिए | Why |
| कुतः | – | कहाँ से | From where |
| कति | – | कितने | How Many |

**एतानि अव्ययपदानि सन्ति।**

# उपसर्गाः

## ■ पठन्तु अवगच्छन्तु च–

निर्गुणः (निर्-गुणः), उपैति (उप-एति), निपातेन (नि-पातेन), परिवर्तन्ते (परि-वर्तन्ते), सुकृतिनः (सु-कृतिनः), परित्यजन्ति (परि-त्यजन्ति) इत्यादिषु पदेषु 'निर्', 'उप', 'नि', 'परि', 'सु' इत्यादयः ''उपसर्गाः'' इति कथ्यन्ते। एते द्वाविंशतिः (22) सन्ति–प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आ, नि, अधि, अपि, सु, अभि, अति, प्रति, परि, उप, उत्।

**ध्यातव्यम् यत्–**

एतेषां प्रयोगः पदानाम् आदौ (प्रारम्भे) भवति।

**यथा–**

| | | |
|---|---|---|
| आहारः | – | आ + हारः |
| उपकारः | – | उप + कारः |
| विहरति | – | वि + हरति |
| आगच्छति | – | आ + गच्छति |

एवमेव अन्यत्र अपि।

## ■ उपसर्गेण युक्तस्य पदस्य अर्थः क्वचित् भिन्नः अथवा विशिष्टः भवति।

| | | | |
|---|---|---|---|
| **यथा–** | गच्छति | – | आगच्छति |
| | हरति | – | विहरति अथवा प्रहरति |
| | जनः | – | सज्जनः अथवा दुर्जनः |

## ■ क्वचित् अर्थभेदः न भवति–

| | | | |
|---|---|---|---|
| **यथा–** | जयः | – | विजयः |
| | नमति | – | प्रणमति |

## ■ एतानि वाक्यानि पठन्तु अवगच्छन्तु च–

(i) छात्रः विद्यालयं गच्छति।
सः विद्यालये पाठम् **अव**गच्छति।
विद्यालयात् पाठं पठित्वा सः गृहम् आगच्छति।

(ii) रामः वनं गच्छति। सीता अपि रामम् **अनु**गच्छति। तौ तत्र कष्टम् **अनु**भवतः।

(iii) गुरुः आश्रमं **प्र**विशति। सः छात्रं प्रश्नं पृच्छति। शिष्यः आसनात् **उत्**तिष्ठति **उत्**तरति च। पुनः गुरुः छात्रम् **उप**दिशति।

(iv) बालकः उद्याने भ्रमति। तत्र वृक्षम् **आ**रोहति फलं च त्रोटयति। पुनः वृक्षात् अवरोहति गृहं च गच्छति।

(v) नृपः दुर्गं **प्र**विशति। सः धनं वितरति। सेवकः नृपं परिचरति। नृपः सेवकं निर्दिशति। सेवकः **प्रति**वदति।

## अभ्यासः

**1. अधोलिखितवाक्येषु उपसर्गयुक्तानि पदानि रेखाङ्कितानि कृत्वा उपसर्गान् पृथक् कृत्वा लिखन्तु–**

(i) छात्रः आपणात् पुस्तकानि आनयति। ----------------------------------------

(ii) शिष्यः गुरुम् अनुवदति। ----------------------------------------

(iii) अहम् अवगच्छामि। ----------------------------------------

(iv) सज्जनः सदैव उपकरोति। ----------------------------------------

(v) विनीतः प्रातः पञ्चवादने उत्तिष्ठति। ----------------------------------------

(vi) मानवस्य अधिकारः कर्मणि एव अस्ति। ----------------------------------------

(vii) त्वं कदापि निर्धनानाम् उपहासं न कुर्याः। ----------------------------------------

(viii) दशरथः अयोध्यायाः अधिपतिः आसीत्। ----------------------------------------

**2. अधोलिखितवाक्येषु कोष्ठकेषु प्रदत्तानि पदानि योजयित्वा वाक्यानि पुनः लिखन्तु–**

(i) छात्रः विषयम् (अव + गच्छति)। ----------------------------------------

(ii) राजा आसनम् (अधि + आस्ते)। ----------------------------------------

(iii) सज्जनाः सदैव जनान् (उप + कुर्वन्ति)। ----------------------------------------

(iv) अम्बा बालाय दुग्धम् (आ + नयति)। ----------------------------------------

(v) विमानम् आकाशे (उत् + पतति)। ----------------------------------------

(vi) शिष्यः पाठस्य (अभि + आसम्)अकरोत्। ----------------------------------------

(vii) पिता फलानि (आ + नयति)। ----------------------------------------

(viii) महान् जनः सदैव प्रसन्नताम् (अनु + भवति)। ----------------------------------------

# अव्ययपदानि

## ■ निम्नलिखितान् शब्दान् पश्यन्तु पठन्तु च। एतेषाम् अर्थाः अपि दत्ताः सन्ति।

| | | | |
|---|---|---|---|
| तदा | तब | इतस्ततः | इधर-उधर |
| धिक् | धिक्कार | एकदा | एकबार |
| मा | मत करो | बहिः | बाहर |
| यदा | जब | अलम् | मना करना |
| सर्वत्र | सब जगह | अपि | भी |

**एतानि पदानि "अव्ययपदानि" कथ्यन्ते। एतेषां कदापि भिन्नरूपाणि न भवन्ति। एतानि पदानि त्रिषु लिङ्गेषु सर्वासु विभक्तिषु सर्वेषु च वचनेषु सर्वदा समानानि एव भवन्ति।**

## अभ्यासः

**1. मञ्जूषातः उचितानि अव्ययपदानि चित्वा रिक्तस्थानानि पूरयन्तु–**

अपि, अलम्, धिक्, तदा, सर्वत्र, बहिः, इतस्ततः

(i) ईश्वरः ------------------------- अस्ति।

(ii) छात्राः कक्षायाः ------------------------- न भ्रमेयुः।

(iii) ------------------------- असत्यवादिनम्।

(iv) कुक्कुराः मार्गेषु ------------------------- भ्रमन्ति।

(v) त्वम् ------------------------- मम प्रियं मित्रम्।

(vi) ------------------------- विवादेन।

(vii) यदा भवान् मम गृहम् आगमिष्यति ------------------------- वयं भ्रमितुं नद्याः तटं गमिष्यामः।

******

# वसुधैव कुटुम्बकम्

द्वितीयः पाठः



एषः काकः अस्ति।



एषा चटका अस्ति।



एते द्वे मित्रे स्तः।



एकदा **इतस्ततः परिभ्रम्य** तौ एकस्मिन् वृक्षे निर्मितम् एकं सुन्दरं गृहम् अपश्यताम्।



सुन्दरं गृहं दृष्ट्वा तौ अचिन्तयताम्— ''किमर्थं न आवयोः अपि **एतादृशं** सुन्दरं गृहं भवेत्! अतः अधुना आवाम् अपि एतादृशं सुन्दरं गृहं **रचयिष्यावः**।'' इति **चिन्तयित्वा** स्वनिवासम् अगच्छताम्।

## शब्दार्थाः : Word-Meaning

**इतस्ततः** — इधर-उधर (here and there) **परिभ्रम्य** — घूमकर (after roaming)
**एतादृशं** — इतना/ऐसा (like this) **रचयिष्यावः** — बनाएँगे (will make)
**चिन्तयित्वा** — सोचकर (having thought)



काकः वृक्षे **मृत्तिकया**
सुन्दरं गृहं निर्मितवान्।



चटका **तृणैः** स्वगृहं निर्मितवती।



एकदा **भीषणे** ग्रीष्मकाले **सर्वत्र** शुष्कम् अभवत्। सर्वे दुःखिनः आसन्।
चटकायाः गृहम् अपि नष्टम् अभवत्। सा खिन्ना आसीत्। सा चिन्तयति– ''किं करोमि?''



परन्तु काकस्य गृहं न नष्टम्। तत् तु मृत्तिकायाः आसीत्।



चटका चिन्तयित्वा काकस्य गृहं गच्छति।



चटका काकं कथयति– ''भ्रातः।
अस्मिन् भीषणे ग्रीष्मकाले मम गृहं नष्टम् अभवत्।
सर्वत्र **उष्णः** अस्ति। मह्यं स्वगृहे शरणं यच्छ।''

## शब्दार्थाः Word-Meaning

- **मृत्तिकया** – मिट्टी से (with soil)
- **तृणैः** – तिनकों से (with straws)
- **भीषणे** – अत्यधिक (too much)
- **सर्वत्र** – सब जगह (every where)
- **उष्णः** – गर्म/गर्मी (hot/heat)



काकः अभिमानी आसीत्।

सः अकथयत्– गच्छ, गच्छ। अत्र स्थानं न अस्ति। **कुत्रचित् अन्यत्र** गच्छ। तव गृहं नष्टम्। अहं किं करवाणि?



तत् श्रुत्वा **खिन्ना** चटका गच्छति।



**गच्छति काले** ग्रीष्मकालः समाप्तः। वर्षा ऋतुः च आगच्छत्। सर्वत्र **हरीतिमा** आसीत्। चटका नवीनं गृहम् अरचयत्।

तदैव सहसा अतिवृष्टिः अभवत्। काकस्य गृहं नष्टम् अभवत्। खिन्नः काकः शरणार्थं चटकायाः समीपम् अगच्छत्।



## शब्दार्थाः Word-Meaning

**कुत्रचित् अन्यत्र** – कहीं और/किसी और जगह (somewhere else) | **खिन्ना** – उदास (sad, unhappy)
**गच्छति काले** – समय बीतने पर (with the passage of time) | **हरीतिमा** – हरियाली (greenary)



चटका तस्य सहर्षं स्वागतं करोति। सर्वं च **अवगम्य** कथयति– ''भ्रातः! चिन्तां मा कुरु। अहं सर्वम् अवगच्छामि। अहं तव प्रतीक्षायाम् आसम्। **अन्तः** आगच्छतु।''



काकः लज्जितः भवति। चटका पुनः कथयति– ''भ्रातः। चिन्तां त्यजतु। आनन्देन भोजनं करोतु। वर्षापर्यन्तम् आवां मिलित्वा अत्र स्थास्यावः। स्वागतं तव। भोजनं करोतु।''



लज्जितः काकः भोजनं करोति। सः चिन्तयति– ''अहं तु स्वार्थी अस्मि परम् एषा उदारहृदया अस्ति।''



वर्षाकालात् **अनन्तरं** काकः पुनः नवीनगृहस्य निर्माणं करोति। चटका अपि **साहाय्यं** करोति। **उभौ मिलित्वा** सुखेन वसतः।

**सत्यम् एव कथितम्–''उदारचरितानां तु *वसुधैव कुटुम्बकम्*।''**

## शब्दार्थाः Word-Meaning

**अवगम्य** – जानकर (having understood) | **अन्तः** – अंदर (inside) | **अनन्तरं** – पश्चात् (after)
**साहाय्यं** – सहायता (help) | **उभौ** – दोनों (both) | **मिलित्वा** – मिलकर (together)
**वसुधैव** – पृथ्वी ही (whole world) | **कुटुम्बकम्** – परिवार (family)

## अभ्यासः

1. **पाठं पठित्वा वदन्तु लिखन्तु च 'शुद्धम्' अथवा 'अशुद्धम्'–**

(i) काकः चटका च मित्रे न स्तः। ----------------------------------------

(ii) तौ एकस्मिन् गृहे एकं नरम् अपश्यताम्। ----------------------------------------

(iii) काकस्य गृहं मृत्तिकायाः आसीत्। ----------------------------------------

(iv) चटका काकस्य सहर्षं स्वागतं करोति। ----------------------------------------

(v) उभौ मिलित्वा सुखेन वसतः। ----------------------------------------

2. **मञ्जूषायाः प्रदत्तपदैः रिक्तस्थानानि पूरयन्तु–**

| |
|---|
| आनन्देन |
| मृत्तिकया |
| काकस्य |
| काकः |
| लज्जितः |
| मित्रम् |

(i) एषः -------------------------- अस्ति।

(ii) चटका काकस्य -------------------------- अस्ति।

(iii) काकः वृक्षे -------------------------- सुन्दरं गृहं निर्मितवान्।

(iv) वर्षाकाले -------------------------- गृहं नष्टम् अभवत्।

(v) चटका काकम् -------------------------- भोजनं कर्तुं कथयति।

(vi) काकः -------------------------- भूत्वा भोजनं करोति।

3. **मञ्जूषायाः उचितं विशेष्यपदं चित्वा लिखन्तु–**

| |
|---|
| काकः |
| गृहम् |
| चटका |
| वृक्षे |
| ग्रीष्मकाले |

(i) भीषणे ----------------------------------

(ii) अभिमानी ----------------------------------

(iii) खिन्ना ----------------------------------

(iv) नवीनम् ----------------------------------

(v) एकस्मिन् ----------------------------------

4. **एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) काकः चटका च कुत्र सुन्दरं गृहम् अपश्यताम्? ----------------------------------------------------

(ii) चटका कैः स्वगृहं निर्मितवती? ----------------------------------------------------

(iii) का खिन्ना आसीत्? ----------------------------------------------------

(iv) चटका काकं किं त्यक्तुं कथयति? ----------------------------------------------------

(v) 'तौ सुन्दरं गृहम् अपश्यताम्' इत्यस्मिन् वाक्ये 'तौ' इति कर्तृपदस्य क्रियापदं किम्? ----------------------------------------

5. **एतेषां प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च–**

(i) सुन्दरं गृहं दृष्ट्वा काकः चटका च किम् अचिन्तयताम्?

--------------------------------------------------------------------------------

(ii) चटका काकस्य गृहं गत्वा किं कथयति?

--------------------------------------------------------------------------------

(iii) अभिमानी काकः चटकां किम् अकथयत्?

--------------------------------------------------------------------------------

(vi) काकः लज्जितः भूत्वा किं चिन्तयति?

--------------------------------------------------------------------------------

(v) वर्षाकालात् अनन्तरं किम् अभवत्?

--------------------------------------------------------------------------------

6. **स्थूलपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) तौ **स्वनिवासम्** अगच्छताम्।

--------------------------------------------------------------------------------

(ii) एकदा **ग्रीष्मकाले** सर्वत्र शुष्कम् अभवत्।

--------------------------------------------------------------------------------

(iii) **चटकायाः** गृहम् अपि नष्टम् अभवत्।

--------------------------------------------------------------------------------

(iv) चटका **काकं** कथयति।

--------------------------------------------------------------------------------

(v) काकः **नवीनगृहस्य** निर्माणं करोति।

------------------------------------------------------------

**7. अधोलिखितवाक्यानि कथाक्रमानुसारेण लिखन्तु–**

(i) ग्रीष्मकाले चटकायाः तृणैः निर्मितं गृहं नष्टम् अभवत्।

(ii) उदारहृदया चटका काकस्य साहाय्यं करोति येन काकः लज्जितः अभवत्।

(iii) वर्षाकाले काकस्य मृत्तिकायाः गृहं नष्टम् अभवत्।

(iv) काकः चटका च द्वे मित्रे आस्ताम्।

(v) अभिमानी काकः चटकायै स्वगृहे शरणं न अयच्छत्।

(i) ------------------------------------------------------------

(ii) ------------------------------------------------------------

(iii) ------------------------------------------------------------

(iv) ------------------------------------------------------------

(v) ------------------------------------------------------------

## मूल्यात्मकः प्रश्नः

1. **''अमनः देवांशः च द्वे मित्रे स्तः। देवांशः पठने कुशलः परन्तु अमनस्य रुचिः पठने नास्ति अतः सः परीक्षायां सम्यक् प्रदर्शनं न करोति।''**

   **यदि भवान्/भवती देवांशस्य स्थाने भवेत् तदा अमनस्य सहायतां कथं कुर्यात्?**

2. **''अद्यत्वे प्राकृतिक-आपदाकारणात् महती क्षतिः भवति स्म। तस्मिन् समये सर्वकारः जनाः च यथायोग्यं सहायताम् कुर्वन्ति।''**

   **यदि भवतः समीपे अपि कदाचित् एतादृशी आपदा उत्पन्ना भविष्यति तर्हि भवान्/भवती कथं जनानां सहायतां करिष्यति?**

## ■ गतिविधिः

1. छात्राः कथायाः भावम् आधृत्य अन्यां कथाम् अन्विष्य सचित्रं भित्तिपत्रनिर्माणं करिष्यन्ति।
2. भवान्/भवती स्वमित्राणां नामानि लिखित्वा तेषां रुचिम् अपि लिखतु–

| क्रमसङ्ख्या | मित्राणां नामानि | तेषां रुचिः |
|---|---|---|
| | | |

## व्याकरणम्

# 'क्त्वा' प्रत्ययस्य प्रयोगः

■ एतानि वाक्यानि पठन्तु–





बालः **पठति।**

बालः **क्रीडति।**

बालः पठित्वा क्रीडति।

रमा विद्यालयं **गच्छति।**

रमा **पठति।**

रमा विद्यालयं **गत्वा** पठति।





सुरेशः **हसति।**

सुरेशः **वदति।**

सुरेशः **हसित्वा** वदति।

शिशुः **क्रीडति।**

शिशुः **खादति।**

शिशुः **क्रीडित्वा** खादति।

**प्रश्नः –** अत्र वयं किं पश्यामः ?

**उत्तरम् –** अत्र वयं पश्यामः यत्–

यदा कोऽपि कापि वा समानजनः कार्यद्वयं करोति तदा पूर्वकार्यवाचके क्रियापदे 'क्त्वा' प्रत्ययस्य प्रयोगः भवति। यथा उपरिलिखितेषु वाक्येषु–

| पूर्वक्रियापदानि | → | 'क्त्वा' प्रत्ययान्त-प्रयोगाः |
|---|---|---|
| पठति (पढ़ता है) | → | पठित्वा (पढ़कर) |
| गच्छति (जाता है) | → | गत्वा (जाकर) |
| हसति (हँसता है) | → | हसित्वा (हँसकर) |
| क्रीडति (खेलता है) | → | क्रीडित्वा (खेलकर) |

## अभ्यासः

1. **मञ्जूषायाः उचितपदानि चित्वा वाक्यानि पूरयन्तु–**

पीत्वा, चलित्वा, भ्रमित्वा, गत्वा, नत्वा, नर्तित्वा, कथयित्वा, क्रीडित्वा, दृष्ट्वा

(i) छात्रः पाठं (पूर्वक्रिया) **पठति**, लेखं च (पश्चात् क्रिया) लिखति।

छात्रः पाठं **पठित्वा** लेखं लिखति।

(ii) जनाः **भ्रमन्ति**, वदन्ति च।

-----------------------------------------------

(iii) पिता **कथयति**, चलति च।

-----------------------------------------------

(vi) गजः **चलति**, खादति च।

-----------------------------------------------

(v) शिशुः **क्रीडति**, जलं च पिबति।

-----------------------------------------------

(vi) बाला **गच्छति**, पाठं च पठति।

---

(vii) छात्रा **नमति**, कथां च कथयति।

---

(viii) नर्तकः **नृत्यति**, प्रसन्नः च भवति।

---

(ix) त्वं दुग्धं **पिबसि**, तत्र च क्रीडसि।

---

(x) अहं **पश्यामि**, कन्दुकेन च क्रीडामि।

---

(xi) ते **नमन्ति**, अत्र तिष्ठन्ति च।

---

■ यदा धातुः उपसर्गेण युक्तः भवति तदा 'क्त्वा' प्रत्ययस्य स्थाने 'ल्यप्' प्रत्ययः भवति यथा–

| क्त्वा–युक्तं पदम् | ल्यप्-युक्तं पदम् |
|---|---|
| पठ्– पठित्वा | सम् + पठ्– सम्पठ्य (भली-भाँति पढ़कर) |
| गम– गत्वा | अव + गम्– अवगम्य (समझकर) |
| भ्रम्– भ्रमित्वा | परि + भ्रम्– परिभ्रम्य (चारों ओर घूमकर) |
| दा– दत्वा | प्र + दा– प्रदाय (देकर) |
| नम्– नत्वा | प्र + नम्– प्रणम्य (नमस्कार करके) |
| त्यज्– त्यक्त्वा | परि + त्यज्– परित्यज्य (छोड़कर) |
| पूज्– पूजयित्वा | सम् + पूज्– सम्पूज्य (पूजकर) |

## ■ वाक्यानि पठन्तु अवगच्छन्तु च–

(क) सः विद्यालयं गत्वा पठति।
सः विद्यालयम् आगत्य अपि पठति।

(ख) सः मातापितरौ नत्वा कार्यं प्रारभते।
सः मातापितरौ प्रणम्य कार्यं प्रारभते।

(ग) भक्तः ईश्वरं पूजयित्वा खादति।
भक्तः ईश्वरं सम्पूज्य खादति।

(घ) सः दानं दत्वा पठति।
सः दानं प्रदाय पठति।

## अभ्यासः

**1. 'क्त्वा' स्थाने 'ल्यप्' प्रत्ययस्य प्रयोगं कुरुत–**

(i) सः ईश्वरं नत्वा कार्यं करोति।
सः ईश्वरं ---------------------------- (प्र + नम् + ल्यप्) कार्यं करोति।

(ii) सः हसित्वा कथयति।
सः ---------------------------- (प्र + हस् + ल्यप्) कथयति।

(iii) सः दुष्कर्म त्यक्त्वा प्रसन्नः भवति।
सः दुष्कर्म ---------------------------- (परि + त्यज् + ल्यप्) प्रसन्नः भवति।

(iv) सा कन्या प्रकृतिसौन्दर्यं ईक्षित्वा प्रसीदति।
सा कन्या प्रकृतिसौन्दर्यं ---------------------------- (निर् + ईक्ष् + ल्यप्) प्रसीदति।

(v) कृपणः धनम् आप्त्वा प्रसीदति।
कृपणः धनम् ---------------------------- (प्र + आप् + ल्यप्) प्रसीदति।

2. **अक्षयः कथं जीवनं यापयति। अस्य दिनचर्यां निर्देशानुसारं 'क्त्वा' तथा 'ल्यप्' प्रत्यय-युक्तैः पदैः लिखत–**

अक्षयः प्रातः ---------------------------- (उत् + स्था + ल्यप्) प्रातर्विधिं ------------ ---------------- (कृ + क्त्वा) उद्यानं -------------------------- (गम् + क्त्वा) व्यायामं करोति। व्यायामं ---------------------------- (कृ + क्त्वा) प्रातराशं ---------------- ----------- (सम् + आप् + ल्यप्) विद्यालयं गच्छति। विद्यालये ------------------ -------(पठ् + क्त्वा) गृहम् --------------------------- (आ + गम् + ल्यप्) विश्रामं ---------------------------- (कृ + क्त्वा) पुनः पठति। पठनस्य पश्चात् खेलितुम् उद्यानं गच्छति। उद्याने --------------------------- (खेल + क्त्वा) गृहं -------------------------- (आ + गम् + ल्यप्) रात्रिभोजनं --------------------------- (कृ + क्त्वा) पुनः पठितुम् उपविशति। ततः सः शयनाय गच्छति। एषा अस्ति अक्षयस्य दिनचर्या।



## भवत् (आप, You)

### ■ एतानि वाक्यानि पठन्तु–

| | | | | |
|---|---|---|---|---|
| (i) | भवान् किमपि न अकथयत्। | = | त्वं किमपि न अकथयः। | |
| (ii) | भवान् गच्छति। | = | त्वं गच्छसि। | (पुल्लिङ्गे) |
| (iii) | युवां पठथः। | = | भवन्तौ पठतः। | (पुल्लिङ्गे) |
| (iv) | यूयं नमथ। | = | भवन्तः नमन्ति। | (पुल्लिङ्गे) |

**एवमेव–**

| | | | | |
|---|---|---|---|---|
| (v) | त्वं गमिष्यसि। | = | भवती गमिष्यति। | (स्त्रीलिङ्गे) |
| (vi) | युवां गमिष्यथः। | = | भवत्यौ गमिष्यतः। | (स्त्रीलिङ्गे) |
| (vii) | यूयं गमिष्यथ। | = | भवत्यः गमिष्यन्ति। | (स्त्रीलिङ्गे) |
| (viii) | त्वं शिक्षकः। | = | भवान् शिक्षकः। | (पुल्लिङ्गे) |
| (ix) | त्वं शिक्षिका। | = | भवती शिक्षिका। | (स्त्रीलिङ्गे) |
| (x) | युवां शिक्षकौ। | = | भवन्तौ शिक्षकौ। | (पुल्लिङ्गे) |

| | | | | |
|---|---|---|---|---|
| (xi) | यूयं शिक्षकाः। | = | भवन्तः शिक्षकाः। | (पुल्लिङ्गे) |
| (xii) | युवां शिक्षिके। | = | भवत्यौ शिक्षिके। | (स्त्रीलिङ्गे) |
| (xiii) | यूयं शिक्षिकाः। | = | भवत्यः शिक्षिकाः। | (स्त्रीलिङ्गे) |

**प्रश्न –** अत्र वयं किं पश्यामः?

**उत्तरम् –** अत्र वयं पश्यामः यत् एतेषु वाक्येषु–

**पुल्लिङ्गे**

| | |
|---|---|
| '**त्वम्**' स्थाने '**भवान्**' पदं प्रयुक्तम्। | (एकवचने) |
| '**युवाम्**' स्थाने '**भवन्तौ**' पदं प्रयुक्तम्। | (द्विवचने) |
| '**यूयम्**' स्थाने '**भवन्तः**' पदं प्रयुक्तम्। | (बहुवचने) |

**स्त्रीलिङ्गे**

| | |
|---|---|
| '**त्वम्**' स्थाने '**भवती**' पदं प्रयुक्तम्। | (एकवचने) |
| '**युवाम्**' स्थाने '**भवत्यौ**' पदं प्रयुक्तम्। | (द्विवचने) |
| '**यूयम्**' स्थाने '**भवत्यः**' पदं प्रयुक्तम्। | (बहुवचने) |

## ■ पुनः पश्यन्तु वदन्तु च–

| | **पुल्लिङ्गे** | **स्त्रीलिङ्गे** |
|---|---|---|
| **एकवचने** | **भवान्** पठति। | **भवती** पठति। |
| **द्विवचने** | **भवन्तौ** पठतः। | **भवत्यौ** पठतः। |
| **बहुवचने** | **भवन्तः** पठन्ति। | **भवत्यः** पठन्ति। |

**ध्यातव्यम् यत्–**

- 'त्वम्, युवाम्, यूयम्' पदैः सह सर्वेषु लकारेषु मध्यमपुरुषस्य क्रियायाः प्रयोगः भवति। परन्तु–
- 'भवान्, भवती, भवन्तौ, भवत्यौ, भवन्तः, भवत्यः' पदैः सह प्रथमपुरुषस्य क्रियायाः प्रयोगः भवति।

## अभ्यासः

**1. रिक्तस्थानानि पूरयन्तु–**

| **लिङ्गम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| पुल्लिङ्गे | भवान् लिखति | भवन्तौ लिखतः | भवन्तः लिखन्ति |
| स्त्रीलिङ्गे | ------------ लिखति | ------------ | ------------ |
| ------------ | ------------ | भवन्तौ चलतः | ------------ |
| ------------ | ------------ | भवत्यौ भ्रमतः | ------------ |
| ------------ | भवती खादति | ------------ | ------------ |
| ------------ | ------------ | ------------ | भवत्यः नमन्ति |
| ------------ | ------------ | ------------ | भवन्तः नमन्ति |

**2. निर्देशानुसारं परिवर्तनं कृत्वा वाक्यानि पुनः लिखत–**

(i) भवान् किं करोति? (स्त्रीलिङ्गे)

------------------------------------------------------------

(ii) त्वं कुत्र गच्छसि? (बहुवचने)

------------------------------------------------------------

(iii) भवत्यः किमर्थं धावन्ति? (एकवचने)

------------------------------------------------------------

(vi) युवां चित्रं पश्यथः। (एकवचने)

------------------------------------------------------------

(v) भवन्तौ कदा पठतः? (पुल्लिङ्गे)

------------------------------------------------------------

******